चतुर्थः पाठः। विध्यर्थमाला । (कण्ठस्थीकरणार्थम्)

सुभाषितानि संस्कृतभाषाया: वैशिष्ट्यपूर्णानि पद्यरत्नानि । सुभाषितानि अस्माकं मन: रञ्जयन्ति, अस्माकं ज्ञानं वर्धयन्ति, कथं व्यवहार: करणीय:, किं कर्तव्यं, किं च न करणीयम् इति सम्यक् बोधयन्ति ।

सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत्सुखम् ।
सुखार्थिन: कुतो विद्या कुतो विद्यार्थिन: सुखम् ।।१।।

[सुखार्थी चेत् विद्यां **त्यजेत्** । विद्यार्थी चेत् सुखं **त्यजेत्** । सुखार्थिन: विद्या कुत: ? विद्यार्थिन: सुखं कुत: ?]

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेत् जलम् ।
सत्यपूतां वदेत् वाणीं मन:पूतं समाचरेत् ।।२।।

[दृष्टिपूतं पादं **न्यसेत्** । वस्त्रपूतं जलं **पिबेत्** । सत्यपूतां वाणीं **वदेत्** । मन:पूतं **समाचरेत्** ।]

धनमलब्धं काङ्क्षेत, लब्धं रक्षेत् प्रयत्नत: ।
रक्षितं वर्धयेत् सम्यक्, वृद्धं तीर्थेषु निक्षिपेत् ।।३।।

[अलब्धं धनं **काङ्क्षेत** । लब्धं (धनं) प्रयत्नत: **रक्षेत्** । रक्षितं (धनं) सम्यक् **वर्धयेत्** । वृद्धं (धनं) तीर्थेषु **निक्षिपेत्** ।]

अक्रोधेन जयेत् क्रोधम् असाधुं साधुना जयेत् ।
जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम् ।।४।।

[अक्रोधेन क्रोधं **जयेत्** । साधुना असाधुं **जयेत्** । दानेन कदर्यं **जयेत्** । सत्येन च अनृतं **जयेत्** ।]

प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मन: ।
किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति ।।५।।

[नर: आत्मन: चरितं प्रत्यहं **प्रत्यवेक्षेत** किं नु मे (चरितं) पशुभि: तुल्यम्? किं नु (मे चरितं) सत्पुरुषै: (तुल्यम्) इति ।]

भाषाभ्यास:

श्लोक: १–

१) एकवाक्येन उत्तरत ।

(अ) विद्यार्थी किं त्यजेत् ?
(आ) सुखार्थी किं त्यजेत्?

२. सन्धिविग्रहं कुरुत ।

१) त्यजेद्विद्याम् २) त्यजेत्सुखम्
३) कुतो विद्या ४) कुतो विद्यार्थिन:

३. समानार्थकशब्दं लिखत ।

१) विद्या २) विद्यार्थी

श्लोक: २.

१) एकवाक्येन उत्तरत ।

(अ) कीदृशं जलं पिबेत् ?
(आ) कीदृशीं वाणीं वदेत् ?

२. समानार्थकशब्दं चित्वा लिखत ।

१) वाक् २) पवित्रम् ३) ऋतम् ४) उदकम् ।

३. स्तम्भमेलनं कुरुत ।

विशेषणम्	दृष्टिपूत:, वस्त्रपूतम्, मन:पूतम्, सत्यपूता
विशेष्यम्	वाणी, आचरणम्, पाद:, जलम्

श्लोक: ३–

१. एकवाक्येन उत्तरत ।

(अ) मनुज: कीदृशं धनं काङ्क्षेत ?
(आ) वृद्धं धनं कुत्र निक्षिपेत्?

२. क्रमानुसारं रचयत।

१) धनस्य रक्षणम्। (२) तीर्थेषु दानम्।
(३) धनस्य इच्छा। (४) धनस्य वर्धनम् ।

श्लोक: ४ –

१. एकवाक्येन उत्तरत।

अ) क्रोधं केन जयेत्? आ) दानेन किं जयेत्?
इ) सत्येन किं जयेत्?

२. विरुद्धार्थकशब्दं लिखत ।

क्रोध:, असाधु:, सत्यम्, दानम् ।

३. श्लोकात् तृतीयान्तपदानि चित्वा लिखत ।

४. सन्धिविग्रहं कुरुत । चानृतम्

श्लोक: ५ –

१) एकवाक्येन उत्तरत।

अ) प्रत्यहं किं प्रत्यवेक्षेत ?
आ) चरितं केन तुल्यं माऽस्तु ?
इ) चरितं केन तुल्यम् अस्तु ?

२. सन्धिं कुरुत।

अ) पशुभि: + तुल्यम् आ) किम् + नु
इ) सत्पुरुषै: + इति ई) नर: + चरितम्

३ समानार्थकशब्दानां युग्मं चिनुत।

अ	प्रत्यहम् , नर:, चरितम्, पशु:, तुल्य:, सत्पुरुषा:
आ	वर्तनम्, मृग:, प्रतिदिनम्, मनुज:, सज्जना:, सम:

पठत अवगच्छत ! **स्वराणां सृष्टि:।**

पङ्क्तिद्वयं पठत। १. सेवा न किञ्चिदस्तीति भिक्षा **नैव** च **नैव** च। नैव = न + एव
२. **रथस्यैकं** चक्रं भुजगयमिता: सप्त तुरगा:। रथस्यैकम् – रथस्य + एकम्।

३) वृद्धिसन्धि:।

अ) अ/आ + ए/ऐ = ऐ
१. न + एतद् = नैतद्।
२. मम + _____ = ममैश्वर्यम्।

आ) अ/आ + ओ/औ = औ
१. मम + ओज: = ममौज:।
२. तव + _____ = तवौदार्यम्।

पङ्क्तिद्वयं पठत। १. योगक्षेमं **वहाम्यहम्**। वहाम्यहम् = वहामि + अहम्।
२. **अस्त्युत्तरस्यां** दिशि देवतात्मा हिमालयो नाम नगाधिराज:। अस्त्युत्तरस्यां = अस्ति + उत्तरस्याम्।

४. यण्सन्धि:।

अ) इ/ई + विजातीय: स्वर: = य्।
१. इति + अपि = इत्यपि।
२. करोमि + ____ = करोम्यहम्।

आ) उ/ऊ + विजातीय: स्वर: = व्।
१. खलु + एतत् = खल्वेतत्।
२. मनु + _____ = मन्वन्तरम्।

पङ्क्तिद्वयं पठत। १. **द्वाविमौ** पुरुषौ लोके क्षरश्चाक्षर एव च। द्वाविमौ = द्वौ + इमौ।
२. **मातापितराविह** मम न स्त:, एकाकी खलु खिन्नोऽहम्। मातापितराविह – मातापितरौ + इह।

५. अयादिसन्धि:।

अ) ए/ऐ + कोऽपि स्वर: = अय्/आय्
१. समीपे + एव = समीपयेव / समीप एव ।
२. कृते + _____= कृतयायाहि / कृत आयाहि ।
३. _____ + अपि = मत्यायपि / मत्या अपि ।
४. तस्मै + _____ = तस्मायपि / तस्मा अपि ।

आ) ओ/औ + कोऽपि स्वर: = अव्/आव्
१. द्वौ + एव = द्वावेव।
२. तौ + _____ = तावपि।
३. _____+ अपि = उभावपि।
४. _____+ आस्ताम् = सुहृदावास्ताम्।

रम्यसंस्कृतम्। क्रियापदं किं कथयति? – १

'क्रियापदम्' इति वाक्यस्य महत्त्वपूर्णम् अङ्गम्।

बालकः ग्रन्थं **पठति**। इति वाक्ये '**पठति**' इति क्रियापदम्। तेन कस्य बोधः भवति ?

(१) पठनस्य क्रिया ✓

(२) परस्मैपदम् ✓

(३) प्रथमः पुरुषः ✓

(४) एकवचनम् ✓

(५) लट्लकारः ✓

(६) धातोः गणविकरणम् ✓

(७) कर्तुः पुरुषः वचनं च ?

अधुना एतानि वाक्यानि पठत।

(१) **बालकः** ग्रन्थं **पठति**।

(२) **बालकौ** ग्रन्थं **पठतः**।

(३) **बालकाः** ग्रन्थं **पठन्ति**।

(४) **अहं** ग्रन्थं **पठामि**।

(५) **त्वं** ग्रन्थं **पठसि**।

एतेषु वाक्येषु क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति। यदि कर्तृपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अतः कर्तृप्रधानानि वाक्यानि इमानि ।

'**पठति**' इति क्रियापदस्य श्रवणेनैव कर्ता प्रथमपुरुषस्य एकवचने इति ज्ञायते । तथैव '**पठामि**' इति पदेन कर्ता उत्तमपुरुषस्य एकवचने इति स्पष्टं भवति । एवं क्रियापदेन कर्तृपदस्य पुरुषस्य वचनस्य अपि बोधः भवति ।

कर्तृवाच्यः प्रयोगः। (कर्तरि प्रयोगः)

कर्ता	कर्म	क्रियापदम्
प्रथमा विभक्तिः	द्वितीया विभक्तिः	**कर्तृपदस्य पुरुषवचनानुसारम्**

(१) मधुरा सुधाखण्डान् आनयति।



क्रियापदं कर्तृपदम् अनुसरति ।

अतः कर्तृवाच्यं क्रियापदम् इदम्।

२) वयं ग्रन्थं पठामः।



क्रियापदं कर्तृपदम् अनुसरति ।

अतः कर्तृवाच्यं क्रियापदम् इदम्।

रम्यसंस्कृतम्। क: कृतवान्? का कृतवती?

बाल: जलं पिबति।

बाल: जलं **पीतवान्**।

अनीश: गच्छति।

अनीश: **गतवान्**।

छात्रा: खेलन्ति।

छात्रा: **खेलितवन्त:**।

वयं पठाम:।

वयं **पठितवन्त:**।

महिला क्षिपति।

महिला **क्षिप्तवती**।

दीपा नृत्यति।

दीपा **नर्तितवती**।

ता: प्रक्षालयन्ति।

ता: **प्रक्षालितवत्य:**।

छात्रा: लिखन्ति।

छात्रा: **लिखितवत्य:**।

पीतवान्, गतवान्, खेलितवन्त:, पठितवन्त: इत्यादीनि भूतकालवाचकानि क्तवतु-प्रत्ययान्त-विशेषणानि।

सम्भाषापत्रम्

१. मेलनं कुरुत।

१. शिक्षका:	सुप्तवती।
२. बालिका:	प्रविष्टवन्त:।
३. रक्षक:	पूजितवत्य:।
४. बिडाली	ताडितवान्।

२. शुद्धं वा अशुद्धम्?

१. सिंह: तं हतवान्।
२. ते बालका: अन्नं न त्यक्तवन्त:।
३. आपणिक: देवं नतवती।
४. एता: अद्य क्रीडितवन्त:।
५. अहं शाकानि कर्तितवान्।

३. तालिकां पूरयत ।

	सः	ते	सा	ताः
खादति	खादितवान्	खादितवन्तः	खादितवती	खादितवत्यः
करोति	कृतवान्	कृतवन्तः	कृतवती	कृतवत्यः
वदति			उदितवती	
पश्यति		दृष्टवन्तः		
गायति				गीतवत्यः
उत्तिष्ठति				उत्थितवत्यः
नयति	नीतवान्			
यच्छति				दत्तवत्यः
पूजयति		पूजितवन्तः		
लभते				लब्धवत्यः

४. परिच्छेदे क्तवतु-रूपाणि अधोरेखितानि कुरुत ।

दीपावलि-उत्सवसमयः आसीत् । जनाः गृहाणि स्वच्छीकृतवन्तः । माता मिष्टान्नानि कृतवती । जनकः नूतनवस्त्राणि क्रीतवान् किन्तु स्फोटकानि न आनीतवान् । भगिनी सुन्दरीं रङ्गवल्लीम् आलिखितवती । महिलाः मृद्दीपान् प्रज्ज्वाल्य स्थापितवत्यः । अहं मित्रैः सह भ्रमणार्थं बहिः गतवान् । सर्वत्र हर्षः प्रकाशः च ।